# Vighneshvara Pujavidhanam

# વિઘ્નેશ્વરપૂજાવિધાનમ્

## Document Information

Text title : Vighneshvara Pujavidhanam

File name : vighneshvarapUjAvidhAnam.itx

Category : ganesha, pUjA

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

*sanskritdocuments.org*

# વિઘ્નેશ્વરપૂજાવિધાનમ્

આદૌ વિઘ્નેશ્વરપૂજા
(ચિકીર્ષિતસ્ય કર્મણઃ નિર્વિઘ્નેન પરિસમાપ્ત્યર્થં
હરિદ્રાબિમ્બે ક્રિયમાણા પૂજા)
ૐ વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
અવિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

શ્રીગુરુભ્યો નમઃ ।
શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપશાન્તયે ॥

પ્રાણાયામઃ ।
કરિષ્યમાણસ્ય કર્મણો નિર્વિઘ્નેન પરિસમાપ્ત્યર્થં આદૌ વિઘ્નેશ્વર
પૂજાં કરિષ્યે (અપ ઉપસ્પૃશ્ય)
ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનાં ઉપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શ઼ૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ।
અસ્મિન્ હરિદ્રાબિમ્બે સુમુખં વિઘ્નેશ્વરં ધ્યાયામિ । આવાહયામિ ।
(સર્વત્ર આદૌ ઓમિતિ પ્રણવો યોજ્યઃ ।)
સુમુખાય વિઘ્નેશ્વરાય નમઃ આસનં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ પાદ્યં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ અર્ઘ્યં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ આચમનીયં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ મધુપર્કં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ સ્નાપયામિ । સ્નાનાનન્તરં આચમનીયં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ વસ્ત્રાણિ ધારયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ ઉપવીતં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ આભરણાનિ સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ ગન્ધાન્ધારયામિ । ગન્ધોપરિ હરિદ્રાકુઙ્કુમં સમર્પયામિ ।

સુમુખાય વિઘ્નેશ્વરાય નમઃ અક્ષતાન્ સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ પુષ્પૈઃ પૂજયામિ ।
ૐ સુમુખાય નમઃ । ૐ એકદન્તાય નમઃ । ૐ કપિલાય નમઃ ।
ૐ ગજકર્ણકાય નમઃ । ૐ લમ્બોદરાય નમઃ । ૐ વિકટાય નમઃ ।
ૐ વિઘ્નરાજાય નમઃ । ૐ વિનાયકાય નમઃ । ૐ ધૂમકેતવે નમઃ ।
ૐ ગણાધ્યક્ષાય નમઃ । ૐ ફાલચન્દ્રાય નમઃ । ૐ ગજાનનાય નમઃ ।
ૐ વક્રતુણ્ડાય નમઃ । ૐ શૂર્પકર્ણાય નમઃ । ૐ હેરમ્બાય નમઃ ।
ૐ સ્કન્દપૂર્વજાય નમઃ । ૐ વિઘ્નેશ્વરાય નમઃ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ ધૂપમાઘ્રાપયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ દીપં દર્શયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ નારિકેલખણ્ડદ્વયં કદલીફલં ગુડં
સર્વં મહાનૈવેદ્યં નિવેદયામિ ।
નિવેદનાનન્તરં આચમનં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ કર્પૂરતામ્બૂલં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ મન્ત્રપુષ્પં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ સ્વર્ણપુષ્પં સમર્પયામિ ।
સુમુખાય વિઘ્નેશ્વરાય નમઃ સર્વોપચારપૂજાઃ સમર્પયામિ ।
વક્રતુણ્ડ મહાકાય સૂર્યકોટિ સમપ્રભ ।
નિર્વિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ।
સુમુખશ્ચૈકદન્તશ્ચ કપિલો ગજકર્ણકઃ ।
લમ્બોદરશ્ચ વિકટો વિઘ્નરાજો વિનાયકઃ ।
ધૂમકેતુર્ગણાધ્યક્ષઃ ફાલચન્દ્રો ગજાનનઃ ।
વક્રતુણ્ડઃ શૂર્પકર્ણો હેરમ્બઃ સ્કન્દપૂર્વજઃ ।
ષોડશૈતાનિ નામાનિ યઃ પઠેચ્છૃણુયાદપિ ।
વિદ્યારમ્ભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા ।
સઙ્ગ્રામે સર્વકાર્યેષુ વિઘ્નસ્તસ્ય ન જાયતે ॥

(ચિકીર્ષિતં કર્મ આરભ્ય વિઘ્નેશ્વરં યથાસ્થાનં પ્રતિષ્ઠાપયેત્ ।)અસ્માત્
હરિદ્રાબિમ્બાત્ ભગવન્તં સુમુખં વિઘ્નેશ્વરં યથાસ્થાનં
પ્રતિષ્ઠાપયામિ -શોભનાર્થે
ક્ષેમાય પુનરાગમનાય ચ ॥

ઇતિ વિઘ્નેશ્વરપૂજાવિધાનં સમ્પૂર્ણમ્ ।

Proofread by Narendran Madathil

*Vighneshvara Pujavidhanam*

pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*